शास्त्री–I साहित्य

अभिज्ञानशाकुन्तलम्

Saathi

Date __/__/__

प्र०(1)– पद्यमिदम् व्याख्येयम् ?

भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः

अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥

उत्तरम्– प्रसंगः– प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके शार्ङ्गरवः राज्ञो दुष्यन्तस्य विनीतत्वे न तत्र मम कोऽपि विस्मयो भवति यदि अचेतनानां तरुघनादीनां विनम्रत्वं स्वभाव सिद्धं तर्हि सद्वंशजस्य सज्जनस्य विनम्रत्वे किमाश्चर्यमित्याह –

व्याख्या— तरवः = वृक्षाः, फलागमैः फलानाम आसन्नात् गमा = उत्पत्तयः तैः फलोद्गमैः = फलोद्भवैः, नम्राः = अधोमुखा विनीताश्च भवन्ति। घनाः = मेघाः नवाम्बुभिः वर्षा कालारम्भे अभिनवजलैः दूरं विलम्बन्ते तच्छीला प्रवर्षणशीला भवन्ति दूरविलम्बिनः = अत्यर्थं लम्बमानाः, सत्पुरुषाः = सज्जनाः समृद्धिभिः धन विद्याधिकारादिसम्पत्तिभिः अनुद्धताः = विनीताः एव औद्धत्यविरोधिनः भवन्ति। एषः नम्रत्वानुद्धत्वादि रूपः परोपकारिणाम = परोपकारपरायणानां दुष्यन्तसदृशानाम् स्वभाव एव = निसर्ग एव किं तत्रास्माकं प्रशंसा परम्पराभिरिति भाव

Renu Devi

16/08/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया।

Page No.

शास्त्री - II साहित्य

रघुवंश महाकाव्यम्

त्रयोदशःसर्गः

Date ___/___/___

प्र० (1) → तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः कविकुलकलाधर कविताकामिनी-वाग्विलासो महाकविः कालिदास प्रणीतस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति यात्रावर्णनक्रमे सूर्यरश्मयो हि सागरादेवापो गृह्णन्ति । अस्मादेव विविधानि रत्नानि समुद्भवन्ति । सागरे एव वडवानलो विराजते । चन्द्रमस उद्भवोऽपि समुद्रादेवाजायतेति भावः ।

व्याख्या :— अर्कमरीचयः = भास्करकिरणाः । अस्मात् = समुद्रात्, गर्भम् = जलमयं कोषम् । दधति = वृष्ट्यर्थं धारयन्ति, अत्र = समुद्रे । वसूनि = धनानि, विवृद्धिम् = समृद्धिम् । अश्नुवते = प्राप्नुवन्ति । असौ = समुद्रः, अबिन्धनम् = जलदाहकम्, वह्निम् = अनलम्, बिभर्ति = धारयति । अनेन = समुद्रेण, प्रह्लादनम् = आह्लादकम् । ज्योतिः = प्रकाशकश्चन्द्रः, अजनि = जनितम् ।

Renu Devi
16/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

उपशास्त्री-I साहित्य - तृतीय-पत्रम्
किरातार्जुनीय महाकाव्यम्
प्रथमः सर्गः

Date ___/___/___

प्र० (1) - पद्य मिदम् व्याख्येयम् ।
न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति अस्मिन् श्लोके वनेचरः दुर्योधनस्य गुणेषु वर्णनं करोति ।

व्याख्या:— तेन = उस (दुर्योधन) ने । क्वाचित् = कभी भी, सज्यं = डोरी चढ़ाया हुआ, धनुः = धनुष । न उद्यतं = ऊपर नहीं किया (फिर भी) नराधिपैः = राजाओं द्वारा । अस्य = इसकी, शासनं = आज्ञा । गुणानुरागेण = (इसके दया - दाक्षिण्यादि) गुणों पर अनुरक्त होने के कारण (और माला के सुगन्धि गुण के कारण अथवा गुण = सूत्र में गुंथे होने के कारण) माल्यम् इव = माला की तरह । शिरोधार्य । शिरोभिः उह्यते = शिरों से धारण की जाती है।

Renu Devi
16/08/20
राधाउमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री -II

साहित्य - तृतीय - पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

Date __/__/__

प्र० (1) पद्यमिदम् व्याख्येयम् ।

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः पण्डित महाकवि भारविप्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी धर्मराज युधिष्ठिरं प्रति कथयति - यदा शत्रवः निरन्तरमपकारपरायणा एव भवन्ति तदा प्रचुरप्रतापशालिनो भवतः समयपरिपालनम् नोचितम् । यतो हि विजयाभिलाषो राजानः शत्रु-विषये सन्धिविघटनं केनापि छलेना कुर्वन्ति ।

व्याख्या - परेषु = शत्रुषु, निकृतिपरेषु = प्रधानं येषु तेषु तयोक्तेषु अपकारतत्परेषु सत्सु । भूरिधाम्नः = महौजसः प्रतीकार - क्षमस्य । ते = तव, समयः = त्रयोदशसंवत्सरान्वने वत्स्यामी' परिरक्षणं = परिपालनं, न क्षमं = न युक्तम् । हि = यस्मात् विजयार्थिनः = विजिगीषवः । क्षितीशाः = क्षितेः ईशाः । अरिषु = शत्रुषु विषये, सोपधि = सकपटं यथा तथा । सन्धिदूषणानि विदधति = केनचित् व्याजेन दोषमापाद्य सन्धिं दूषयन्ति । विघटयन्तीत्यर्थः । शक्तस्य हि विजिगीषोः सर्वथाकार्यसाधनं प्रधानमन्यत् समयरक्षणादिकम् - शक्तस्येति भावः । अर्थान्तरन्यासोऽलंकारः पुष्पिताग्रा वृत्तम् ।

Renu Devi
16/08/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।